श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीरङ्गनाथ पादुकासहस्रम् ॥

## ॥ बहुरत्नपद्धतिः षोडशी ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ बहुरत्नपद्धतिः षोडशी ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

मुखबाहूरुपादेभ्यो वर्णान् सृष्टवतः प्रभोः।
प्रपद्ये पादुकां रत्नैर्व्यक्तवर्णव्यवस्थितिम्॥ १६.१ ॥

मणिभिः सितरक्तपीतकृष्णैर्भवती काञ्चनपादुके ! विचित्रा।
युगभेदविकल्पितं मुरारेः युगपद्दर्शयतीव वर्णभेदम्॥ १६.२ ॥

नवरत्नविचित्रिता मुरारेः पदयोस्त्वं मणिपादुके ! विभासि।
नवखण्डवती वसुन्धरेव प्रणयाज्जन्मभुवं समाश्रयन्ती॥ १६.३ ॥

सहसा विनिवेद्य सापराधान्
    त्वदधीनस्वपदे मुकुन्दपादे।
अरुणोपलसक्तमौक्तिकश्रीः
    स्मयमानेव विभासि पादुके ! त्वम्॥ १६.४ ॥

बहुरत्नसमुद्भवं मयूखं तव मन्ये मणिपादुके ! मुरारेः।
चरणोपगतं मयूरपिञ्छं मकुटारोहणसाहसं प्रमार्ष्टुम्॥ १६.५ ॥

प्रभया हरिनीलमौक्तिकानां
    विकसन्त्या दिशसीव पादुके ! त्वम्।
मधुभिच्चरणारविन्दलक्ष्म्याः
    स्रजमिन्दीवरपुण्डरीकबद्धाम्॥ १६.६ ॥

तव माधवपादुके ! मणीनां प्रभया देवि ! सितासितारुणानाम्।
वहते गिरिशस्य मौळिगङ्गा कुमुदेन्दीवरपद्मकाननानि॥ १६.७ ॥

पृथग्विधानां द्युतिभिर्मणीनां त्वां पादुके ! लोहितशुक्लकृष्णाम्।
विहारहेतोरिह रङ्गभर्तुः पादानुषक्तां प्रकृतिं प्रतीमः॥ १६.८ ॥

तमालनीलद्युतिमिन्द्रनीलैः मुक्तानुविद्धां मणिपादुके ! त्वाम्।
अवैमि रङ्गेश्वरकान्तिसिन्धोः वेलामविश्रान्तगतागतार्हाम्॥ १६.९ ॥

अवैमि रङ्गेश्वरपादुकाभ्यां अकालकाल्यं विभवं विधातुम्।
वज्रेन्द्रनीलव्यपदेशदृश्यं बन्दीकृतं नूनमहस्त्रियामम्॥ १६.१० ॥

पदस्य गोप्त्री भवती मुरारेः मणिस्पृशा मौक्तिकरत्नभासा।
अन्तर्दृशं साञ्जनया मुनीनां अनक्ति कर्पूरशलाकयेव॥ १६.११ ॥

मुक्तामयूखप्रकरैः सुभद्रा
कृष्णा महेन्द्रोपलरश्मिजालैः।
मान्या मुरारेर्मणिपादुके ! त्वं
विहारयुक्ता विजयं वृणोषि॥ १६.१२ ॥

विचित्रवर्णां मणिपादुके ! त्वां छन्दोमयीं सामनिबद्धगीतिम्।
मुनीन्द्रजुष्टां द्विपदां मुरारेः प्रत्यायिकां काञ्चिदृचं प्रतीमः॥ १६.१३ ॥

प्रसेदुषी गोत्रभिदः प्रणामैः पुष्णासि रङ्गेश्वरपादुके ! त्वम्।
मणिप्रभासंवलनापदेशात् प्रायस्तदर्हाणि शरासनानि॥ १६.१४ ॥

शोणाश्मनां तव हरिन्मणिरश्मिभिन्नं
बालातपं बलिविमर्दनपादरक्षे !।
श्यामीकृतं शुकशकुन्तगणप्रवेशात्
शङ्के सतां किमपि शालिवनं विपक्वम्॥ १६.१५ ॥

संभिद्यमानमणिविद्रुममौक्तिकश्रीः
सैरन्ध्रिकेव भवती मणिपादरक्षे !।
प्रस्तौति रङ्गनृपतेश्चरणारविन्दे
कस्तूरिकाघुसृणचन्दनपङ्कचर्चाम्॥ १६.१६ ॥

आतन्वतीमसुरमर्दनपादरक्षे !
शुद्धान्तपक्ष्मळदृशां मदनेन्द्रजालम्।

वैहारिकीं विविधरत्नमयूखलक्षात्
    मन्ये समुद्वहसि मोहनपिञ्छिकां त्वम्॥ १६.१७ ॥

रत्नैर्व्यवस्थितसितासितशोणवर्णैः
    आलोकवद्भिरजहत् श्रुतिसन्निकर्षैः।
द्रष्टुं मुकुन्दचरणावनिमेषदृश्यौ
    सन्दृश्यसे जननि ! सम्भृतनेत्रपङ्क्तिः॥ १६.१८ ॥

गारुत्मतान्तरितमौक्तिकपङ्क्तिलक्ष्यात्
    दूर्वामधूकरचितं दुरितोपशान्त्यै।
मातः ! स्वयं वहसि मुग्धधियां प्रजानां
    मङ्गळ्यमाल्यमिव माधवपादुके ! त्वम्॥ १६.१९ ॥

रङ्गाधिराजपदरक्षिणि ! राजते ते
    वज्रोपसङ्घटितमौक्तिकविद्रुमश्रीः।
सक्ता चिरं मनसि संयमिनां निवासात्
    सूर्येन्दुवह्निमयमण्डलवासनेव॥ १६.२० ॥

आसक्तवासवशिलाशकलास्त्वदीयाः
    पद्मासहायपदरक्षिणि ! पद्मरागाः।
प्रत्यक्षयन्ति कमपि भ्रमराभिलीनं
    पादारविन्दमकरन्दरसप्रवाहम्॥ १६.२१ ॥

अन्तःपुराणि समयेष्वभिगन्तुमेका
    रङ्गेशितुर्व्रजपयसीव पदावनि ! त्वम्।
मुक्तांशुजालमिळनाद्रुचिरैः प्रवाळैः
    बिम्बाधरं स्मितविशेषयुतं प्रियाणाम्॥ १६.२२ ॥

रङ्गेश्वरस्य मृगयोश्चरणावसक्तां
    रक्षःकपीन्द्रमकुटेषु निवेशयोग्याम्।
मन्ये पदावनि ! निबद्धविचित्ररत्नां
    मायामृगस्य रचितामिव चर्मणा त्वाम्॥ १६.२३ ॥

बध्नासि रङ्गपतिविभ्रमपादुके ! त्वं
मायाकिरातमकुटे नवबर्हमालाम्।
आकृष्टवासवधनुश्शकलैर्मणीनाम्
अन्योन्यसङ्घटितकर्बुरितैर्मयूखैः॥ १६.२४ ॥

अन्योन्यबन्धुरहरिन्मणिपद्मरागा
रङ्गेश्वरस्य चरणावनि ! राजसे त्वम्।
आत्मोपमानविभवाच्चरितार्थयन्ती
शैलात्मजागिरिशयोरिव मूर्तिमेकाम्॥ १६.२५ ॥

तापत्रयप्रशमनाय समाश्रितानां
सन्दर्शितारुणसितासितरत्नपङ्क्तिः।
पुष्णासि रङ्गनृपतेर्मणिपादुके ! त्वं
प्रायः सरोजकुमुदोत्पलकाननानि॥ १६.२६ ॥

देहद्युतिं प्रकटयन्ति महेन्द्रनीलाः
शौरेः पदाम्बुजरुचिं तव पद्मरागाः।
अन्योन्यलब्धपरभागतया त्वमीषाम्
आभाति कान्तिरपरा मणिपादरक्षे !॥ १६.२७ ॥

आकीर्णमौक्तिकहरिन्मणिपद्मरागाम्
अम्भोजलोचनपदावनि ! भावये त्वाम्।
तत्पादविश्रमजुषां श्रुतिसुन्दरीणां
वर्णोपधानमिव मौळिनिवेशयोग्यम्॥ १६.२८ ॥

आसन्नवासवशिलाशकलास्त्वदीयाः
पद्मेक्षणस्य पदरक्षिणि ! पद्मरागाः।
सम्भावयन्ति समये क्वचिदुष्णभानोः
सद्यः प्रसूतयमुनासुभगामवस्थाम्॥ १६.२९ ॥

मुक्तेन्द्रनीलमणिभिर्विहिते भवत्याः
पङ्क्ती दृढे परमपूरुषपादरक्षे !।

मन्ये समाश्रितजनस्य तवानुभावात्
उन्मोचिते सुकृतदुष्कृतशृङ्खले द्वे॥ १६.३० ॥

उद्गीर्णगाढतमसो हरिनीलभङ्गाः
ताराविशेषरुचिराणि च मौक्तिकानि।
त्वत्सङ्गमात् सरसिजेक्षणपादरक्षे !
संयोजयन्ति निशया भवमौळिचन्द्रम्॥ १६.३१ ॥

विष्णोः पदेन घटिता मणिपादुके ! त्वं
व्यक्तेन्द्रनीलरुचिरुज्ज्वलमौक्तिकश्रीः।
कालेषु दीव्यसि मरुद्भिरुदीर्यमाणा
कादम्बिनीव परितः स्फुटवारिबिन्दुः॥ १६.३२ ॥

भासा स्वया भगवतो मणिपादरक्षे !
मुक्तान्विता मरतकोपलपद्धतिस्ते।
नित्यावगाहनसहं सकलस्य जन्तोः
गङ्गान्वितं जनयतीव समुद्रमन्यम्॥ १६.३३ ॥

सूर्यात्मजा हरिशिलामणिपङ्क्तिलक्ष्यात्
त्वां नित्यमाश्रितवती मणिपादरक्षे !।
आदौ जनार्दनपदे क्षणमात्रलग्नाम्
आसन्नमौक्तिकरुचा हसतीव गङ्गाम्॥ १६.३४ ॥

पर्यन्तसन्घटितभासुरपद्मरागाः
पद्मोदरभ्रमरकान्तिमुषस्त्वदीयाः।
त्वत्संश्रयेण चरणावनि ! शक्रनीलाः
पीताम्बरेण पुरुषेण तुलां लभन्ते॥ १६.३५ ॥

शङ्के पदावनि ! सदा परिचिन्वती त्वं
रङ्गेशितुश्चरणपङ्कजसौकुमार्यम्।
अग्रे महोर्मिररुणोपलमौक्तिकानां
प्राज्यां विनिक्षिपसि पल्लवपुष्पपङ्क्तिम्॥ १६.३६ ॥

निर्गच्छता चरणरक्षिणि ! नीयमाना
    रङ्गेश्वरेण भवती रणदीक्षितेन।
सूते सुरारिसुभटीनयनाम्बुजानां
    ज्यौत्स्नीं निशामिव सितासितरत्नभासा॥ १६.३७ ॥

मरकतहरिताङ्गी मेदुरा पद्मरागैः
    अभिनवजलबिन्दुव्यक्तमुक्ताफलश्रीः।
कलयसि पदरक्षे ! कृष्णमेघप्रचारात्
    कनकसरिदनूपे शाद्वलं सेन्द्रकोपम्॥ १६.३८ ॥

विरचितसुरसिन्धोः विष्णुपादारविन्दात्
    समधिकमनुभावं पादुके ! दर्शयन्ती।
वलभिदुपलमुक्तापद्मरागप्रकाशैः
    परिणमयसि नूनं प्राप्तशोणं प्रयागम्॥ १६.३९ ॥

विविधमणिमयूखैर्व्यक्तपक्षां विचित्रैः
    जलनिधिदुहितुस्त्वां वेद्मि लीलाचकोरीम्।
अनिशमविकलानां पादुके ! रङ्गभर्तुः
    चरणनखमणीनां चन्द्रिकामापिबन्तीम्॥ १६.४० ॥

चरणकमलसेवासङ्गिनां रङ्गभर्तुः
    विनयगरिमभाजां वर्जितैरातपत्रैः।
पुनरपि पदरक्षे ! पुष्यसि त्वं सुराणां
    बहुविधमणिकान्त्या बर्हिपिञ्छातपत्रम्॥ १६.४१ ॥

मरकतरुचिपत्रा मौक्तिकस्मेरपुष्पा
    स्फुटकिसलयशोभा भासुरैः पद्मरागैः।
फलमखिलमुदारा रङ्गनाथस्य पादे
    कलयसि भवती नः कल्पवल्लीव काचित्॥ १६.४२ ॥

बहुमणिरुचिराङ्गीं रङ्गनाथस्य पादात्
    निजशिरसि गिरीशो निक्षिपन् पादुके ! त्वाम्।

स्मरति ललितमन्तर्लाळनीयं भवान्याः
  तरळघनकलापं षण्मुखस्यौपवाह्यम्॥ १६.४३ ॥

विविधमणिसमुत्थैः व्यक्तमापादयन्तीं
  दिवसरजनिसन्ध्यायौगपद्यं मयूखैः।
उपनिषदुपगीतां पादुके ! रङ्गिणस्त्वाम्
  अघटितघटनार्हां शक्तिमालोचयामः॥ १६.४४ ॥

सकलमिदमवन्ध्ये शासने स्थापयन्ती
  मुरमथनपदस्था मौक्तिकादिप्रकारा।
प्रकटयसि विशुद्धश्यामरक्तादिरूपान्
  फलपरिणतिभेदान् प्राणिनां पादुके ! त्वम्॥ १६.४५ ॥

प्रदिशति मुदमक्ष्णोः पादुके ! देहभाजां
  शतमखमणिपङ्क्तिः शार्ङ्गिणस्तुल्यवर्णा।
परिसरनिहितैस्ते पद्मरागप्रदीपैः
  घनतरपरिणद्धा कज्जळश्यामिकेव॥ १६.४६ ॥

कलयाऽपि हानिरहितेषु सदा
  तव मौक्तिकेषु परितः प्रथते।
उपरज्यमानहरिणाङ्कतुला
  हरिपादुके ! हरिशिलामहसा॥ १६.४७ ॥

मरकतपत्रळा रुचिरविद्रुमपल्लविता
  पृथुतरमौक्तिकस्तबकिता निगमैः सुरभिः।
उपवनदेवतेव चरणावनि ! रङ्गपतेः
  अभिलषतो विहारमभिगम्य पदं स्पृशसि॥ १६.४८ ॥

सदोत्तुङ्गे रङ्गक्षितिरमणपादप्रणयिनि !
  त्वदालोके तत्तन्मणिकिरणसम्भेदकलुषे।
प्रतिस्रोतोवृत्त्या प्रथितरुचिभेदं न सहते
  नवाम्भस्स्वाच्छन्द्यं नमदमरकोटीरमकरः॥ १६.४९ ॥

जनयसि पदावनि ! त्वं मुक्ताशोणमणिशक्रनीलरुचा।
नखरुचिसन्ततिरुचिरां नन्दकनिस्त्रिंशसम्पदं शौरेः॥ १६.५० ॥

॥ इति श्रीपादुकासहस्रे बहुरत्नपद्धतिः षोडशी ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥